
**द्वितीय: पाठ:**

# न्यग्रोधवृक्ष:

**प्रकृति: एव पर्यावरणम् अस्ति। तस्या: असन्तुलनमेव पर्यावरणस्य विनाशकारणम्। पर्यावरणशब्द: परि+आवरणम् इत्यनयो: पदयो: सम्मेलनेन निष्पन्न: भवति। अस्यार्थ: अस्मान् परित: स्थितम् आवरणम् एव पर्यावरणम्। पर्यावरणक्षरणेन उत्पन्ना: या: समस्या: सन्ति तासु ''ओजोनपरत'' इत्यस्य क्षरणम् एका प्रमुखा समस्या। अस्या:प्रमुखं कारणं वनानां व्यापकरूपेण नाश: अपि अस्ति। संस्कृतसाहित्ये तु प्राचीनकालादेव पर्यावरणसंरक्षणं प्रति जागरूकता दृश्यते। अत्र एतं विषयम् अवलम्ब्यैव एषा कथा प्रस्तुतास्ति।**

कस्मिंश्चित् ग्रामे एक: प्राचीन: विशाल: च न्यग्रोधवृक्ष: आसीत्। स: पशुपक्षिभ्य: बहुविधेभ्य: जीवजन्तुभ्य: मनुष्येभ्य: अपि नित्यं बहूपकारक: आसीत्। पथिका: तस्य वृक्षस्य छायायां पाथेयं भक्षयित्वा मार्गायासं परिहरन्ति स्म। पशव: छायार्थं वृक्षमिमम् आश्रयन्ति स्म। पक्षिण: तस्य शाखासु नीडानि विरच्य वसन्ति स्म। सर्पाश्च तत्रत्येषु वल्मीकेषु वासं कुर्वन्ति स्म। एवं स वृक्ष: सर्वप्रिय: सर्वहितकारी सर्वापेक्षित: च आसीत्।



तस्य न्यग्रोधवृक्षस्य शाखायाम् एक: काक: बहुकालात् वसन्नासीत्। कस्मिंश्चित् दिने स वायस: किमपि स्मरन् इतस्तत: दृष्ट्वा एवम् उच्चै: अरटत्- ''हे बन्धव:! श्रूयन्तां मे वच:। अहम् अस्मिन् वृक्षे चिरात् वसामि। अत: अस्योपरि ममैव अधिकार: वर्तते। अयं मदीय: वृक्ष: इति। काकस्य ध्वनि: क्रमेण अन्तरिक्षम् अस्पृशत्।

काकस्य रटनं श्रुत्वा वृक्षस्य समीपे चरन्त: वृक्षाग्रे डयमाना: वृक्षस्य कोटरेषु निवसन्त: च सर्वे प्राणिन: पशव: पक्षिण: सर्पाश्च समायाता:। तेषां मध्ये प्रथमं सर्प: फटाटोपं कुर्वन् न्यगदत् ''पितृपितामहानां कालादपि अहम् अत्रैव निवसामि अतोऽयं वृक्ष: मदीय एव'' इति। तत: शाखात: शाखान्तरं चंक्रम्य एक: कीट: प्रत्यवदत् ''मदीयै: अर्भकै: सार्द्धम् अहं बहुवर्षेभ्य: अत्रैव उषितवानस्मि। अतोऽयं वृक्ष: ममैव'' इति।

अनन्तरं शुक: ''अस्य वृक्षस्य फलानि खादन् जन्मत: अहमत्रैव वर्ते। नाहमिमं द्रुमं परित्यक्तुमिच्छामि। मदीय एवायं न्यग्रोधवृक्ष:'' इति उच्चै: अभणत्। ततश्च तत्रत्या: अपरिमिता: कृमय: कीटाश्च ''अयं तरु: अस्मदीय एव'' इत्युक्त्वा वृक्षस्योपरि स्वं-स्वम् अधिकारं घोषयन् विचित्रतरं कोलाहलम् अकुर्वन्।

अत्रान्तरे कश्चित् अजापुत्र: तत्रागत: । सोऽपि तस्य तरो: पत्राणि खादन् नन्दति स्म । तं दृष्ट्वा सर्वे प्राणिन: न्यायनिर्णयं कर्तुं तं प्रार्थयन्त । सर्वेषां वचनानि श्रुत्वा स अज: अवदत् - ''अस्तु मया समेषां समस्या समाकर्णिता । इदानीं मम वचनानि यूयं शृणुत । काश्चन शाखा: काकेभ्य:, शाखान्तराणि च कृमिकीटेभ्य:, मूलं सर्वेभ्य: अनेन प्रकारेण सर्वेभ्योऽपि वृक्षं विभज्य दापयिष्यामि । अस्मिन्नेव ग्रामे कश्चित् वृक्षच्छेदक: मे मित्रमस्ति । तम् आह्वयामि इमं वृक्षं खण्डश: कर्तुम्'' इति ।

अजस्य निर्णय: सर्वै: स्वीकृत: अत: सर्वेऽपि वृक्षच्छेदकस्य समीपं गत्वा न्यग्रोधवृक्षं छित्वा तस्य भागानाम् वितरणार्थं प्रार्थयन्त । परं सोऽयं काष्ठच्छेदक: अवदत् ''पूर्वम् अहं वृक्षान् छिनद्मि स्म । अधुना तादृशे कुत्सिते कर्मणि न व्यापारयामि । वृक्षाणां छेदनं महत् पापमिति मया अधिगतमस्ति अत: न्यग्रोधवृक्षस्य छेदनम् अहं न करिष्यामि'' इति ।

तथापि सर्वे प्राणिन: तं वृक्षं छेत्तुं यदा निर्बन्धम् अकुर्वन् तदा स धीमान् इदमाह - ''अस्तु तर्हि प्रथमं मे वच: शृणुत-यूयं सर्वेऽपि अनेन वृक्षेण उपकृता: एव । वृक्षस्य उपकारं स्वीकृत्य युष्माभि: क: प्रत्युपकार: कृत: ? युष्माकं मध्ये क: वृक्षस्य जलसेचनम् अकरोत् ? क: तस्य रक्षणं विहितवान् ? न कोऽपि किञ्चिदपि अकरोत् । वरुणदेव: वृष्टिं वर्षति । सूर्यदेव: प्रकाशं प्रयच्छति । भूमाता वृक्षस्य आधारभूता अस्ति । वायु: अनिलं ददाति । ते सर्वे वृक्षं पालयन्ति पोषयन्ति रक्षन्ति च । ते न कदापि ''मम अधिकार: वर्तते'' इति अवदन् । ते सर्वे परोपकारिण: । परं यूयं सर्वे परापकारिण: वृक्षस्य साहाय्यं स्वीकृत्य तमेव नाशयितुं कृतसङ्कल्पा यूयं स्वाश्रयमेव नाशयथ । अस्मिन् वृक्षे छिन्ने सति यूयं कुत्र गमिष्यथ ?

सर्वमिदं श्रुत्वा पशुपक्षिण: ''आम् । सत्यम् । वयं स्वकर्त्तव्यं विस्मृत्य अधिकारार्थं कोलाहलं कुर्म: । वृक्ष: प्रकृतिदत्त: वर: अस्ति । स न कस्यापि एकस्य सम्पत् भवितुमर्हति । अस्माभि: सर्वै: मिलित्वा वृक्षस्य संरक्षणं संवर्धनं समारोपणं च कर्त्तव्यम् । न तु विनाश: कार्य:'' इति दृढनिश्चयम् अकुर्वन् । अस्माभि: मानवै: अपि वृक्षसम्पत् वर्धनीया ननु ।

## शब्दार्थ:

न्यग्रोधवृक्ष: - बरगद का पेड़ । बहूपकारक: - बहुत अधिक उपकार करने वाला । बहुविधेभ्य: - अनेक प्रकार के । पथिका: - राहगीर । पाथेयम् - रास्ते का भोजन । मार्गायासम् - रास्ते की थकान को । नीडानि - घोंसले । विरच्य - रचकर/बनाकर । वल्मीकेषु - बिलों में । वायस: - कौआ । न्यगदत् - बोला । मदीय: - मेरा । डयमाना: - उड़ते हुए । फटाटोपं कुर्वन् - फण से क्रोध को प्रकट करते हुए, फुसकारते हुए । चंक्रम्य - घूमकर । अर्भकै: सह - पुत्रों के साथ । उषितवानस्मि - रह रहा हूँ । द्रुमम् - वृक्ष को । अभणत् - बोला । घोषयन् - घोषणा करते हुए । तत्रत्या: - वहाँ के । अजापुत्र: - बकरी का बच्चा । नन्दति - प्रसन्न होता है । समेषाम् - सभी की । दापयिष्यामि - दिलवाऊँगा । वृक्षच्छेदक: - वृक्ष को काटने वाला/लकड़हारा । आह्वयामि - बुलाता हूँ । खण्डश: - टुकड़े-टुकड़े । छित्वा - काटकर । कुत्सिते - निन्दित में/बुरे में । छिनत्ति - काटता है । धीमान् - बुद्धिमान् । वृष्टिम् - वर्षा को । भूमाता - धरती माता । परापकारिण: - दूसरों का अपकार करने वाला । साहाय्यम् - सहायता को । स्वाश्रयमेव - अपने आश्रय को ही ।

## अभ्यासः

1. **एकपदेन उत्तरं लिखत –**

(क) ग्रामे कः वृक्षः आसीत् ?

(ख) के मार्गायासं परिहरन्ति स्म ?

(ग) कस्य ध्वनिः अन्तरिक्षम् अस्पृशत् ?

(घ) प्रकृतिदत्तः वरः कः ?

(ङ) तरोः पत्राणि खादन् कः नन्दति स्म ?

2. **एकवाक्येन उत्तरं लिखत –**

(क) सर्वैः कस्य निर्णयः स्वीकृतः ?

(ख) कः वृष्टिं वर्षति ?

(ग) वृक्षस्य आधारभूता का ?

(घ) अस्माभिः का वर्धनीया ?

(ङ) किं महत् पापम् अस्ति ?

3. **अधोलिखितप्रश्नानाम् उत्तराणि लिखत –**

(क) शुकः किम् अवदत् ?

(ख) कीटः किं प्रत्यवदत् ?

(ग) वृक्षच्छेदनविषये काष्ठच्छेदकः किम् अवदत् ?

4. **प्रदत्तशब्दैः रिक्तस्थानानि पूरयत –**

(नीडानि, अनिलं, मार्गायासं, सूर्यदेवः, चंक्रम्य)

(क) शाखान्तरं ........................................ एकः कीटः अवदत्।

(ख) पथिकाः ............................ परिहरन्ति स्म।

(ग) पक्षिणः शाखासु .................................... विरच्य वसन्ति स्म।

(घ) वायुः ............................. ददाति।

(ङ) .................................... प्रकाशं प्रयच्छति।

5. **यथायोग्यं योजयत –**

| 'अ' | 'आ' |
|---|---|
| (क) प्राचीनः | सर्पः करोति |
| (ख) वरुणदेवः | न्यग्रोधवृक्षः |
| (ग) फटाटोपम् | वृष्टिं वर्षति |
| (घ) सर्पाः | वृक्षः |
| (ङ) प्रकृतिदत्तः वरः | वल्मीकेषु |

6. **शुद्धवाक्यानां समक्षम् ''आम्'' अशुद्धवाक्यानां समक्षं ''न'' इति लिखत -**

(क) शुकस्य ध्वनि: अन्तरिक्षम् अस्पृशत्। ☐

(ख) कीट: अर्भकै: सार्द्धम् वसति स्म। ☐

(ग) वृक्षच्छेदक: वृक्षं खण्डश: कृतवान्। ☐

(घ) वृक्षाणां छेदनं महत् पापम्। ☐

(ङ) सूर्यदेव: वृष्टिं वर्षति। ☐

7. **अधोलिखितपदानां प्रकृतिं प्रत्ययं च पृथक्कुरुत -**

यथा -भक्षयित्वा - भक्ष् + क्त्वा

(क) कुर्वन्

(ख) विभज्य

(ग) छेत्तुम्

(घ) विस्मृत्य

8. **अधोलिखितपदानां सन्धिविच्छेदं कृत्वा सन्धिनाम लिखत -**

| पदम् | विच्छेद: | | सन्धिनाम |
|---|---|---|---|
| यथा -इत्युक्त्वा | इति | + उक्त्वा | यण् सन्धि |
| (क) ममैव | | | |
| (ख) सर्पाश्च | | | |
| (ग) सोऽयम् | | | |
| (घ) तत्रागत: | | | |

9. **अधोलिखितपदानां पर्यायशब्दान् लिखत -**

यथा -वृक्ष: - तरु:

(क) काक:

(ख) सर्प:

(ग) पिता

(घ) पुत्र:

10. **अव्ययै: वाक्यरचनां कुरुत -**

यथा - एव - ईश्वर: एव रक्षक: अस्ति।

(क) अपि

(ख) तर्हि

(ग) तत:

## योग्यताविस्तार: -

- ''वृक्ष:'' इति विषयमधिकृत्य संस्कृते निबन्धं लिखत।
- पर्यावरणसंरक्षणार्थम् उपायान् लिखत।